# શિવપાદાદિકેશાન્તવર્ણનસ્તોત્રમ

## Shivapadadi Keshanta Varnana Stotram

---

શિવપાદાદિ કેશાન્ત વર્ણન સ્તોત્રમ

કલ્યાણં નો વિધત્તાં કટકતટલસત્કલ્પવાહીનિકુઞ્જ-
ક્રીડાસંસક્તવિદ્યાધરનિવહવધૂગીતરુદ્રાપદાનઃ|
તારૈર્હેરમ્બનાદૈસ્તરલિતનિનદત્તારકારાતિકેકી
કૈલાસઃ શર્વનિર્વૃત્યભિજનકપદઃ સર્વદા પર્વતેન્દ્રઃ ||૧||

યસ્ય પ્રાહુઃ સ્વરૂપં સકલદિવિષદાં સારસર્વસ્વયોગં
યસ્યેષુઃ શાર્ઙ્ગધન્વા સમજનિ જગતાં રક્ષણે જાગરૂકઃ |
મૌર્વી દર્વીકરાણામપિ ચ પરિવૃઢઃ પૂસ્રયી સા ચ લક્ષ્યં
સોઽવ્યાદવ્યાજમસ્માનશિવભિદનિશં નાકિનાં શ્રીપિનાકઃ ||૨||

આતઙ્કાવેગહારી સકલદિવિષદામઙ્ઘ્રિપદ્માશ્રયાણાં
માતઙ્ગાદ્યુગ્રદૈત્યપ્રકરતનુગલદ્રક્તધારાક્તધારઃ |
ક્રૂરઃ સૂરાયુતાનામપિ ચ પરિભવં સ્વીયભાસા વિતન્વન
ઘોરાકારઃ કુઠારો દૃઢતરદુરિતાખ્યાટવીં પાટયેન્નઃ |૩||

કાલારાતેઃ કરાગ્રે કૃતવસતિરુરઃશાણતાતો રિપૂણાં
કાલે કાલે કુલાદ્રિપ્રવરતનયયા કલ્પિતસ્નહલેપઃ |
પાયાન્નઃ પાવકાર્ચિઃપ્રસરસખમુખઃ પાપહન્તા નિતાન્તં
શૂલઃ શ્રીપાદસેવાભજનરસજુષાં પાલનૈકાન્તશીલઃ ||૪||

દેવસ્યાઙ્કાશ્રયાયાઃ કુલગિરિદુહિતુર્નેત્રકોણપ્રચાર-
પ્રસ્તારાનત્યુદારાન્પિપટિષુરિવ યો નિત્યમત્યાદરેણ |
આધત્તે ભઙ્ગિતુઙ્ગૈરનિશમવયવૈરન્તરઙ્ગં સમોદં
સોમાપીડસ્ય સોઽયં પ્રદિશતુ કુશલં પાણિરઙ્ગઃ કુરઙ્ગઃ ||૫||

કણ્ઠપ્રાન્તાવસજ્જત્કનકમયમહાઘણ્ટિકાઘોરઘોષૈઃ
કણ્ઠારાવૈરકુણ્ઠૈરપિ ભરિતજગચ્ચક્રવાલાન્તરાલઃ |
ચણ્ડઃ પ્રોદ્દણ્ડશૃઙ્ગઃ કકુદકવલિતોત્તુઙ્ગકૈલાસશ્રૃઙ્ગઃ
કણ્ઠે કાલસ્ય વાહઃ શમયતુ શમલં શાશ્વતઃ શાક્કરેન્દ્રઃ ||૬||

નિર્યદ્દાનામ્બુધારાપરિમળતરળીભૂતલોલમ્બપાલીઝઙ્કારૈઃ
શઙ્કરાદ્રેઃ શિખરશતદરીઃ પૂરયન્ભૂરીઘોષૈઃ |

શાર્ધઃ સૌવર્ણશૈલપ્રતિમપૃથુવપુઃ સર્વવિઘ્નાપહર્તા
શર્વાણ્યાઃ પૂર્વસૂનુઃ સ ભવતુ ભવતાં સ્વસ્તિદો હસ્તિવક્ત્રઃ ||૭||

યઃ પુણ્યૈર્દેવતાનાં સમજનિ શિવયોઃ શ્લાઘ્યવીર્યૈકમત્યા
યન્નામ્નિ શ્રૂયમાણે દિતિજભટઘટા ભીતિભારં ભજન્તે |
ભૂયાત્સોઽયં વિભૂત્યૈ નિશિતશરશિખાપાટિતક્રૌઞ્ચશૈલઃ
સંસારાગાધકૂપોદરપતિતસમુત્તારકસ્તારકારિઃ ||૮||

આરૂઢઃ પ્રૌઢવેગપ્રવિજિતપવનં તુઙ્ગતુઙ્ગં તુરઙ્ગં
ચૈલં નીલં વસાનઃ કરતલવિલસત્કાણ્ડકોદણ્ડદણ્ડઃ |
રાગદ્વેષાદિનાનાવિધમૃગપટલીભીતિકૃદ્ભૂતભર્તા
કુર્વન્નાખેટલીલાં પરિલસતુ મનઃ કાનને મામકીને ||૯||

અમ્ભોજાભ્યાં ચ રમ્ભારથચરણલતાદ્વન્દ્વકુમ્ભીન્દ્રકુમ્ભૈ-
ર્બિમ્બેનેન્દોશ્ચ કમ્બોરુપરિ વિલસતા વિદ્રુમેણોત્પલાભ્યામ |
અમ્ભોદેનાપિ સંભાવિતમુપજનિતાડમ્બરં શમ્બરારેઃ
શમ્ભોઃ સંભોગયોગ્યં કિમપિ ધનમિદં સંભવેત્સંપદે નઃ ||૧૦||

વેણીસૌભાગ્યવિસ્માપિતતપનસુતાચારુવેણીવિલાસાન
વાણીનિર્ધૂતવાણીકરતલવિધૃતોદારવીણાવિરાવાન |
એણીનેત્રાન્તભઙ્ગીનિરસનનિપુણાપાઙ્ગકોણાનુપાસે
શોણાન્પ્રાણાનુદૂઢપ્રતિનવસુષમાકન્દલાનિન્દુમૌલેઃ ||૧૧||

નૃત્તારમ્ભેષુ હસ્તાહતમુરજધિમીધિક્કૃતૈરત્યુદારૈ-
શ્ચિત્તાનન્દં વિધત્તે સદસિ ભગવતઃ સન્તતં યઃ સ નન્દી |
ચણ્ડીશાદ્યાસ્તથાઽન્યે ચતુરગુણગણપ્રીણિતસ્વામિસત્કા-
રોત્કર્ષોદ્યત્પ્રસાદાઃ પ્રમથપરિવૃઢાઃ સન્તુ સન્તોષિણો નઃ ||૧૨||

મુક્તામાણિક્યજાલૈઃ પરિકલિતમહાસાલમાલોકનીયં
પ્રત્યુપ્તાનર્ઘરત્નૈર્દિશિ દિશિ ભવનૈઃ કલ્પિતૈર્દિક્પતીનામ |
ઉદ્યાનૈરદ્રિકન્યાપરિજનવનિતામાનનીયૈઃ પરિતં
હૃદ્યં હૃદ્યસ્તુ નિત્યં મમ ભુવનપતેર્ધામ સોમાર્ધમૌલેઃ ||૧૩||

સ્તમ્ભૈર્જમ્ભારિરત્નપ્રવરવિરચિતૈઃ સંભૃતોપાન્તભાગં
શુમ્ભત્સોપાનમાર્ગં શુચિમણિનિચયૈર્ગુમ્ફિતાનલ્પશિલ્પમ |
કુમ્ભૈઃ સંપૂર્ણશોભં શિરસિ સુઘટિતૈઃ શાતકુમ્ભૈરપઙ્કૈઃ
શમ્ભોઃ સંભાવનીયં સકલમુનિજનૈઃ સ્વસ્તિદં સ્યાત્સદા નઃ ||૧૪||

ન્યસ્તો મધ્યે સભાયાઃ પરિસરવિલસત્પાદપીઠાભિરામો
હૃદ્યઃ પાદૈશ્ચતુર્ભિઃ કનકમણિમયૈરુચ્ચકૈરુજ્જ્વલાત્મા |
વાસોરત્નેન કેનાપ્યધિકમૃદુતરેણાસ્તૃતો વિસ્તૃતશ્રીપીઠઃ

પીડાભરં નઃ શમયતુ શિવયોઃ સ્વૈરસંવાસયોગ્યઃ ||૧૫||

આસીનસ્યાધિપીઠં ત્રિજગદધિપતેરઙ્ઘ્રિપીઠાનુષક્તૌ
પાથોજાભોગભાજૌ પરિમૃદુલતલોલ્લાસિપદ્માભિલેખૌ |
પાતાં પાદાવુભૌ તૌ નમદમરકિરીટોલ્લસચ્ચારુહીર-
શ્રેણીશોણાયમાનોન્નત નખદશકોદ્ભાસમાનૌ સમાનૌ ||૧૬||

યન્નાદો વેદવાચાં નિગદતિ નિખિલં લક્ષણં પક્ષિકેતુર-
લક્ષ્મીસંભોગસૌખ્યં વિરચયતિ યયોશ્ચાપરે રૂપભેદે |
શંભોઃ સંભાવનીયે પદકમલસમાસઙ્ગતસ્તુઙ્ગશોભે
માઙ્ગલ્યં નઃ સમગ્રં સકલસુખકરે નૂપુરે પૂરયેતામ ||૧૭||

અઙ્ગે શૃઙ્ગારયોનેઃ સપદિ શલભતાં નેત્રવહ્નૌ પ્રયાતે
શત્રોરુદ્ધૃત્ય તસ્માદિષુધિયુગમધો ન્યસ્તમગ્રે કિમેતત |
શઙ્કામિત્થં નતાનામમરપરિષદામન્તરઙ્કૂરયત્તત-
સંઘાતં ચારુ જઙ્ઘાયુગમખિલપતેરંહસા સંહરેન્નઃ ||૧૮||

જાનુદ્વન્દ્વેન મીનધ્વજનૃવરસમુદ્ગોપમાનેન સાકં
રાજન્તૌ રાજરમ્ભાકરિકરકનકસ્તમ્ભસંભાવનીયૌ |
ઊરૂ ગૌરીકરામ્ભોરુહસરસસમામર્દનાનન્દભાજૌ
ચારૂ દૂરીક્રિયેતાં  દુરિતમુપચિતં જન્મજન્માન્તરે નઃ ||૧૯||

આમુક્તાનર્ઘરત્નપ્રકરકરપરિષ્વક્તકલ્યાણકાઞ્ચી-
દામ્ના બદ્ધેન દુગ્ધદ્યુતિનિચયમુષા ચીનપટ્ટામ્બરેણ |
સંવીતે શૈલકન્યાસુચરિતપરિપાકાયમાને નિતમ્બે
નિત્યં નર્નર્તુ ચિત્તં મમ નિખિલજગત્સ્વામિનઃ સોમમૌલેઃ ||૨૦||

સન્ધ્યાકાલાનુરજ્યદ્દિનકરસરુચા કાલધૌતેન ગાઢં
વ્યાનદ્ધઃ સ્નિગ્ધમુગ્ધઃ સરસમુદરબન્ધેન વીતોપમેન |
ઉદ્દીપ્રૈઃ સ્વપ્રકાશૈરુપચિતમહિમા મન્મથારેરુદારો
મધ્યો મિથ્યાર્થસધ્ર્યઙ મમ દિશતુ સદા સઙ્ગતિં મઙ્ગળાનામ||૨૧||

નાભીચક્રાલવાલાન્નવનવસુષમાદોહદશ્રીપરીતા-
દુદ્ગચ્છન્તી પુરસ્તાદુદરપથમતિક્રમ્ય વક્ષઃ પ્રયાન્તી |
શ્યામા કામાગમાર્થપ્રકથનલિપિવદ્ભાસતે યા નિકામં
સા માં સોમાર્ધમૌલેઃ સુખયતુ સતતં રોમવલ્લીમતલ્લી ||૨૨||

આશ્લેષેષ્વદ્રિજાયાઃ કઠિનકુચતટીલિપ્તકાશ્મીરપઙ્ક-
વ્યાસઙ્ગાદ્યદુદ્યદર્કદ્યુતિભિરુપચિતસ્પર્ધમુદ્દામહૃદ્યમ |
દક્ષારાતેરુદૂઢપ્રતિનવમણિમાલાવલીભાસમાનં
વક્ષો વિક્ષોભિતાઘં સતતનતિજુષાં રક્ષતાદક્ષતં નઃ ||૨૩||

વામાઙ્કે વિસ્ફુરન્ત્યાઃ કરતલવિલસચ્ચારુરક્તોત્પલાયાઃ
કાન્તાયા વામવક્ષોરુહભરશિખરોન્મર્દનવ્યગ્રમેકં |
અન્યાંસ્ત્રીનપ્યુદારાન્વરપરશુમૃગાલઙ્કૃતાનિન્દુમૌલે-
ર્બાહૂનાબદ્ધહેમાઙ્ગદમણિકટકાનન્તરાલોકયામઃ ||૨૪||

સમ્ભ્રાન્તાયાઃ શિવાયાઃ પતિવિલયભિયા સર્વલોકોપતાપાત-
સંવિગ્નસ્યાપિ વિષ્ણોઃ સરભસમુભયોર્વારણપ્રેરણાભ્યામ |
મધ્યે ત્રૈશઙ્કવીયામનુભવતિ દશાં યત્ર હાલાહલોષ્મા
સોઽયં સર્વાપદાં નઃ શમયતુ નિચયં નીલકણ્ઠસ્ય કણ્ઠઃ ||૨૫||

હૃદ્યૈરદ્રીન્દ્રકન્યામૃદુદશનપદૈર્મુદ્રિતો વિદ્રુમશ્રી-
રુદ્દ્યોતન્ત્યા નિતાન્તં ધવળધવળયા મિશ્રિતો દન્તકાન્ત્યા |
મુક્તામાણિક્યજાલવ્યતિકરસદૃશા તેજસા ભાસમાનઃ
સદ્યોજાતસ્ય દદ્યાદધરમણિરસૌ સંપદાં સઞ્ચયં નઃ ||૨૬||

કર્ણાલઙ્કારનાનામણિનિકરરુચાં સઞ્ચયૈરઞ્ચિતાયાં
વર્ણ્યાયાં સ્વર્ણપદ્મોદરપરિવિલસત્કર્ણિકાસન્નિભાયામ |
પદ્ધત્યાં પ્રાણવાયોઃ પ્રણતજનહૃદમ્ભોજવાસસ્ય
શંભોર્નિત્યં નશ્ચિત્તમેતદ્વિરચયતુ સુખે નાસિકાં નાસિકાયામ ||૨૭||

અત્યન્તં ભાસમાને રુચિરતરરુચાં સઙ્ગમાત્સન્મણીના-
મુદ્યચ્ચણ્ડાંશુધામપ્રસરનિરસનસ્પષ્ટઅદૃષટાપદાને |
ભૂયાસ્તાં ભૂતયે નઃ કરિવરજયિનઃ કર્ણપાશાવલમ્બે
ભક્તાલીભાલસજ્જજ્જનિમરણલિપેઃ કુણ્ડલે કુણ્ડલે તે ||૨૮||

યાભ્યાં કાલવ્યવસ્થા ભવતિ તનુમતાં યો મુખં દેવતાનાં
યેષામાહુઃ સ્વરૂપં જગતિ મુનિવરા દેવતાનાં ત્રયીં તામ |
રુદ્રાણીવક્ત્રપઙ્કેરુહસતતવિહારોત્સુકેન્દીવરેભ્ય-
સ્તેભ્યસ્ત્રિભ્યઃ પ્રણામાઞ્જલિમુપરચયે ત્રીક્ષણસ્યેક્ષણેભ્યઃ ||૨૯||

વામં વામાઙ્કગાયા વદનસરસિજે વ્યાવલદ્વલ્લભાયા
વ્યાનમ્રેષ્વન્યદન્યત્પુનરલિકભવં વીતનિઃશેષરૌક્ષ્યમ |
ભૂયો ભૂયોઽપિ મોદાન્નિપતદતિદયાશીતલં ચૂતબાણે
દક્ષારેરીક્ષણાનાં ત્રયમપહરતાદાશુ તાપત્રયં નઃ ||૩૦||

યસ્મિન્નર્ધેન્દુમુગ્ધદ્યુતિનિચયતિરસ્કારનિસ્તન્દ્રકાન્તૌ
કાશ્મીરક્ષોદસઙ્કલ્પિતમિવ રુચિરં ચિત્રકં ભાતિ નેત્રમ |
તસ્મિન્નુલ્લીલચિલ્લીનટવરતરુણીલાસ્યરઙ્ગાયમાણે
કાલારેઃ ફાલદેશે વિહરતુ હૃદયં વીતચિન્તાન્તરં નઃ ||૩૧||

સ્વામિન ગઙ્ગામિવાઙ્ગીકુરુ તવ શિરસા મામપીત્યર્થયન્તીં
ધન્યાં કન્યાં ખરાંશોઃ શિરસિ વહતિ કિંન્વેષ કારુણ્યશાલી |
ઇત્થં શઙ્કાં જનાનાં જનયદતિઘનં કૈશિકં કાલમેઘ-
ચ્છાયં ભૂયાદુદારં ત્રિપુરવિજયિનઃ શ્રેયસે ભૂયસે નઃ ||૩૨||

શ્રૃઙ્ગારાકલ્પયોગ્યૈઃ શિખરિવરસુતાસત્સખીહસ્તલૂનૈઃ
સૂનૈરાબદ્ધમાલાવલિપરિવિલસત્સૌરભાકૃષ્ટભૃઙ્ગમ |
તુઙ્ગં માણિક્યકાન્ત્યા પરિહસિતસુરાવાસશૈલેન્દ્રશૃઙ્ગં
સઙ્ઘં નઃ સઙ્કટાનાં વિઘટયતુ સદા કાઙ્કટીકં કિરીટમ ||૩૩||

વક્રાકારઃ કલઙ્કી જડતનુરહમપ્યઙ્ઘ્રિસેવાનુભાવા-
દુત્તંસત્વં પ્રયાતઃ સુલભતરઘૃણાસ્યન્દિનશ્ચન્દ્રમૌલેઃ |
તત્સેવન્તાં જનૌઘાઃ શિવમિતિ નિજયાઽવસ્થયૈવ બ્રુવાણં
વન્દે દેવસ્ય શંભોર્મુકુટસુઘટિતં મુગ્ધપીયૂષભાનુમ ||૩૪||

કાન્ત્યા સંફુલ્લમલ્લીકુસુમધવળયા વ્યાપ્ય વિશ્વં વિરાજન
વૃત્તાકારો વિતન્વન મુહુરપિ ચ પરાં નિર્વૃતિં પાદભાજામ |
સાનન્દં નન્દિદોષ્ણા મણિકટકવતા વાહ્યમાનઃ પુરારેઃ
શ્વેતચ્છત્રાખ્યશીતદ્યુતિરપહરતાદસ્તાપદા નઃ ||૩૫||

દિવ્યાકલ્પોજ્જ્વલાનાં શિવગિરિસુતયોઃ પાર્શ્વયોરાશ્રિતાનાં
રુદ્રાણીસત્સખીનામતિતરલકટાક્ષાઞ્ચલૈરઞ્ચિતાનામ |
ઉદ્વેલ્લદ્બાહુવલ્લીવિલસનસમયે ચામરાન્દોલનીનામુદ્ભૂતઃ
કઙ્કણાલીવલયકલકલો વારયેદાપદો નઃ ||૩૬||

સ્વર્ગૌકઃસુન્દરીણાં સુલલિતવપુષાં સ્વામિસેવાપરાણાં
વલ્ગદ્ભૂષાણિ વક્ત્રામ્બુજપરિવિગલન્મુગ્ધગીતામૃતાનિ |
નિત્યં નૃત્તાન્યુપાસે ભુજવિધુતિપદન્યાસભાવાવલોક-
પ્રત્યુદ્યત્પ્રીતિમાદ્યત્પ્રમથનટનટીદત્તસમ્ભાવનાનિ ||૩૭||

સ્થાનપ્રાપ્ત્યા સ્વરાણાં કિમપિ વિશદતાં વ્યઞ્જયન્મઞ્જુવીણા-
સ્વાનાવચ્છિન્નતાલક્રમમમૃતમિવાસ્વાદ્યમાનં શિવાભ્યામ |
નાનારાગાતિહૃદ્યં નવરસમધુરસ્તોત્રજાતાનુ વિદ્ધં
ગાનં વીણામહર્ષેઃ કલમતિલલિતં કર્ણપૂરાયતાં નઃ ||૩૮||

ચેતો જાતપ્રમોદં સપદિ વિદધતી પ્રાણિનાં વાણિનીનાં
પાણિદ્વન્દ્વાગ્રજાગ્રત્સુલલિતરણિતસ્વર્ણતાલાનુકૂલા |
સ્વીયારાવેણ પાથોધરરવપટુના નાદયન્તી મયૂરી
માયૂરીં મન્દભાવં મણિમુરજભવા માર્જના માર્જયેન્નઃ ||૩૯||

દેવેભ્યો દાનવેભ્યઃ પિતૃમુનિપરિષત્સિદ્ધવિદ્યાધરેભ્યઃ

સાધ્યેભ્યશ્ચારણેભ્યો મનુજપશુપતજ્જાતિકીટાદિકેભ્યઃ |
શ્રીકૈલાસપ્રરૂઢાસ્તૃણવિટપિમુખાશ્ચાપિ યે સન્તિ તેભ્યઃ
સવભ્યો નિર્વિચારં નતિમુપરચયે શર્વપાદાશ્રયેભ્યઃ ||૪૦||

ધ્યાયન્નિત્યં પ્રભાતે પ્રતિદિવસમિદં સ્તોત્રરત્નં પઠેદ્યઃ
કિંવા બ્રૂમસ્તદીયં સુચરિતમથવા કીર્તયામઃ સમાસાત |
સમ્પજ્જાતં સમગ્રં સદસિ બહુમતિં સર્વલોકપ્રિયત્વં
સમ્પ્રાપ્યાયુઃશતાન્તે પદમયતિ પરબ્રહ્મણો મન્મથારેઃ ||૪૧||

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરાચાર્યસ્ય કૃતમ
શિવપાદાદિકેશાન્તવર્ણનસ્તોત્રં સંપૂર્ણમ ||

**www.shaivam.org**